P: ISSN NO.: 2394-0344 RNI No.UPBIL/2016/67980 VOL-3* ISSUE-12* (Part-2) March- 2019
E: ISSN NO.: 2455-0817 Remarking An Analisation

# संस्कृतभाषाकौशलसंवर्धनार्थं संस्कृतभारतीप्रकल्पानाम् उपादेयता (राजस्थानप्रदेशस्य विशेषसंदर्भे)

**सारांश**

अस्मिन् संसारे मानवीयसमाजे भावाभिव्यक्तेः प्रमुखं साधनं भाषेति शिक्षाशास्त्रिणः स्वीकुर्वन्ति। भाषायाः माध्यमेन एव मानवीयसभ्यतासंस्कृतेश्च विकासेन सह राष्ट्रगौरवं राष्ट्रैश्वर्यं चापि वर्धयति। अस्माकं राष्ट्रस्य सभ्यता संस्कृतिश्च संस्कृतभाषायां निहितमस्ति। भाषायाः विशिष्टज्ञानावबोधनाय एतस्याः कौशलानां स्वीकरणमपेक्षितं वर्तते। एतदर्थं 'संस्कृतभारती' पक्षतः संस्कृतसंभाषणाय भारतीयसभ्यतासंस्कृतेश्च संरक्षणाय विकासाय च सफलप्रयासाः प्रचलन्ति। इदम् उद्देश्यं स्वीकृत्य एव मया एषः शोधाभिलेखः प्रस्तुतः।

**मुख्य शब्द :** संस्कृतभारती, संस्कृतसंभाषणम्, संस्कृतभाषा, संस्कृतभाषाकौशलानि, संस्कृतशिक्षणस्य विधयः, भाषाकौशलानां सोपापानि, श्रवणकौशलम्, भाषणकौशलम्, पठनकौशलम्, लेखनकौशलम्, राजस्थानप्रदेशः चित्तौडप्रान्तः, जयपुरप्रान्तः, जोधपुरप्रान्तः, संस्कृतभारतीप्रकल्पाः, संस्कृतम्।



**हिम्मत सिंह चौहानः**
शोधच्छात्रः,
संस्कृतम्,
सम्राट–पृथ्वीराज–चौहानः
राजकीय महाविद्यालयः,
अजयमेरुः, राजस्थान, भारत



**आशुतोष पारीकः**
सहायकाचार्यः
संस्कृतम्,
सम्राट–पृथ्वीराज–चौहानः
राजकीय महाविद्यालयः,
अजयमेरुः, राजस्थान, भारत

**प्रस्तावना**

**संस्कृते संस्कृतिर्ज्ञेया संस्कृते सकलाः कलाः।**
**संस्कृते सकलं ज्ञानं संस्कृते किन्न विद्यते।।**[1]

अस्मिन् संसारे अनेकभाषाणां प्रयोगो भवति। तासु सर्वासु भाषासु संस्कृतभाषा सर्वोत्तमा विद्यते। संस्कारयुक्ता दोषरहिता परिष्कृता भाषा एव संस्कृतभाषा कथ्यते। इयमेव भाषा देवभाषा, अमरगिरा, सुरभारती, देववाणी, सुरवाणी, गीर्वाणवाणी अपि उच्यते। अस्मिन् लोके बह्व्यः भाषाः सन्ति, तासु संस्कृतभाषा अतिप्राचीना समृद्धा चास्ति। अनया भाषया एव भारतस्य एकता भवितुं शक्नोति। एतदर्थं 'संस्कृतभारती' संघटनम् अनवरतरूपेण संपूर्णभारते एव न अपितु अखिलविश्वे विगतेभ्यः अष्टात्रिंशत्वर्षेभ्यः प्रयासरतमस्ति। "सर्वस्य अपि संघटनस्य, आन्दोलनस्य संस्थायाः वा किंचित् निर्दिष्ट लक्ष्यं भवति। तद् लक्ष्यं स्पष्टं भवेत्, वाख्येयं च भवेत्। साध्यं ध्येयं च तद् उद्देश्यं तत्तसंघटनकार्यकर्तृभिः सर्वैरपि समानतया सम्यक्तया च अवगतम् अपि स्यात्। संस्कृतस्य सर्वतोमुखविकासं सम्पाद्य भारतस्य सर्वांगीणोन्नतिसम्पादनमेव संस्कृतभारत्याः चरमं लक्ष्यम्। दूरगामिलक्ष्यमिदं साकारीकर्तुम् अपेक्षितस्य देशव्यापिनः, विशालस्य, गुणसम्पन्नस्य, शक्तिशालिनः 'संस्कृतभारती' नामकस्य जनसंघटनस्य निर्माणमेव समीपवर्तिलक्ष्यम्।"[2]

संस्कृतभारत्याः लक्ष्यमस्ति यत् संस्कृतं जनभाषा भवेत् इति। एतदर्थं अस्य संघटनस्य कार्यकर्तारः सर्वत्र अहर्निशं च स्वकार्ये संलग्नाः भूत्वा विभिन्न–प्रकल्पैः अस्याः भाषायाः संवर्धनार्थं प्रयत्नरताः सन्ति। प्राचीनकाले संस्कृतभाषायाः शिक्षणं गुरुकुलेषु आश्रमेषु च भवति स्म। तस्मिन् समये मुद्रणकलायाः प्रचलनं नैव आसीत्। एतस्मात् कारणात् शिक्षणं प्रायशः मौखिकत्वेन एव भवति स्म। कण्ठस्थीकरणेन एव विविधविषयाणां ज्ञानवबोधः भवति स्म। वर्तमानयुगे शनैः–शनैः नूतनाविष्काराः अभवन्, तेन पठन–पाठन–विधिषु परिवर्तनं जातम्। संस्कृतशिक्षणस्य विभिन्नविधीनां सूचीबद्धलेखनं निम्नानुसारं कर्तुं शक्यते–

1. पाठशालाविधिः
2. प्रत्यक्षविधिः
3. व्याकरणानुवादविधिः (भण्डारकरविधिः)
4. अनुवादविधिः
5. मूल्यांकनविधिः
6. पाठ्यपुस्तकविधिः
7. विश्लेषणात्मकविधिः
8. हरबर्टविधिः
9. व्याख्याविधिः
10. समवायविधिः

एतासां शिक्षणविधीनां गुणदोषानां चर्चा विविध–शिक्षण–पुस्तकेषु सविस्तरं कृतमस्ति। अतः 'संस्कृतभारती' संघटनं संस्कृतशिक्षणस्य एवञ्च संभाषणकौशलानां विभिन्नप्रकल्पैः कार्यं कुर्वत् अस्ति। भाषाशिक्षणाय चत्वारि

सोपानानि भाषाकौशलत्वेन निर्धारितानि सन्ति। चतुर्णां भाषाकौशलानां विषये डॉ. विश्वासः कथयति यत्– ''वस्तुतः भाषाशिक्षणे एतेषां चतुर्णामपि समानं महत्त्वम् अस्ति। परन्तु अस्माकं देशे बहोः कालात् संस्कृतशिक्षणे ग्रहणकौशलयोः यावत् प्राधान्यं दत्तं तावत् अभिव्यंजनकौशलयोः न दत्तम्। अभिव्यंजनकौशले तु नितराम् उपेक्षिते। सा च उपेक्षा एतावत्पर्यन्तम् अनुवृत्ता यत् विख्याताः संस्कृतशिक्षणविदः अपि संस्कृतशिक्षणस्य उद्देश्येषु अभिव्यक्तेः आवश्यकता नास्ति इति निर्णयं कृतवन्तः।''[3]




भाषागतकौशलानां महत्त्वविषये डॉ. शिखा चतुर्वेदी कथयति यत्– ''मनुष्याणां संप्रेषण क्षमता भाषाकौशलानां दक्षतायाम् एव आश्रिताऽस्ति। भाषायाः प्रभावशीलतायाः मानदंडः बोधगम्यता भवति। येषां भावानां विचाराणाम् अभिव्यक्तिं कर्तुमिच्छामः तेषां सक्षमतया बोधगम्यता भाषाकौशलेषु एव आश्रिता भवति।''[4]

एतेषां चतुर्णां कौशलानां विषये डॉ. विश्वासः 'कौशलबौधिनी' पुस्तके लिखति–

**श्रवणकौशलम्**

''भाषायाः ग्रहणं प्रायेण श्रवणेन एव भवति। अतः अस्यां प्रक्रियायां श्रवणेन्द्रियस्य अनितरसाधारणं महत्त्वमस्ति। जन्मनः प्रभृति श्रोतुम् अशक्तः बधिरः भाषितुमपि न प्रभवति इत्येषः सर्वेषाम् अनुभवः। शिशोः मातृभाषाधिग्रहणप्रक्रियायां सः शिशुः प्रथमशब्दोच्चारणात्पूर्वं कियत्परिमाणकं वाक्यजातं श्रुतवान् भवति इत्येतत् निश्चयेन विस्मयम् आवहति। सामान्या काचित् गणना एवमस्ति यत् कश्चन शिशुः दिने जाग्रदवस्थायाम् अष्टघण्टाः यावदेव शृणोति चेदपि, सः प्रतिनिमेषम् एकमेव वाक्यं शृणोति चेदपि दशमासान्ते एव सः प्रथमं शब्दम् उच्चारयति चेदपि तत्पूर्वमेव तेन श्रुतानि भवन्ति चतुश्चत्वारिंशत्सहस्राधिकलक्षमितानि (1,44,000) वाक्यानि!''[5]

''असकृत् श्रुतः शब्दः केवलम् उच्चारयितुं शक्यः, नान्यः – इत्येतत् यदि अवगम्यते तर्हि छात्राणां मुखात् सम्भाषणं कारयितुम् इच्छुकैः शिक्षकैः तत्पूर्वं कियत् श्रावणीयं भवति इत्येतत् स्वयंवेद्यं भवति। अधिकम् अश्रावयित्वा छात्रमुखात् सम्भाषणस्य निरीक्षाकरणं नाम जलसेचनम् अकृत्वैव सस्यं फलतु इति प्रतिक्षणमेव!''[6]

**भाषणकौशलम्**

''सुसंस्कृते वातावरणे प्रवृद्धानां बालानां भाषणम् भाषणकौशलशिक्षणं न क्लेशाय। यतः तादृशानां भाषणं स्पष्टं भवति। तेषाम् उच्चारणं शुद्धं भवति, शब्दसम्पत्तिश्च विपुला भवति। तद्विपरीततया अन्यत्र प्रवृद्धानां बालानां भाषणम् अस्पष्टं भवति। उच्चारणं दोषपूर्णं भवति। तेषां शब्दसम्पत्तिः अपि अल्पीयसी भवति। तादृशानां तु बालानां भाषणकौशलस्य शिक्षणं विद्यालयादेव आरभ्येत।''[7]

**पठनकौशलम्**

''तन्नाम पठनक्रियायां सांकेतिकलिपीनां द्वारा तन्निबद्धस्य शब्दस्य साधूच्चारणपूर्वकं तदभिव्यज्यमानस्य अर्थस्यापि ग्रहणं भवति। न केवलं शब्दार्थस्य, अपितु तन्निबद्धानां वाक्यानां वाक्यपुंजस्य अर्थग्रहणमपि तत्र तावदेव प्रामुख्यम् आवहति। 'पठ् व्यक्तायां वाचि' धातोः निष्पन्नस्य 'पठन' शब्दस्य यद्यपि सुव्यक्तरूपेण वाचनमेव अर्थः, तथापि भाषाकौशलान्तर्गतस्य पठनस्य तु अर्थग्रहणपर्यन्तमपि अर्थः अस्ति एव।''[8]

**लेखनकौशलम्**

''स्वाभिलषितस्य अभिप्रायस्य विचारस्य वा प्रकाशनाय लिपिम् आश्रित्य क्रियमाणः अक्षरविन्यास एव लेखनम्।..... 'लिख अक्षरविन्यासे' धातोः निष्पन्नः लेखनशब्दः यद्यपि अक्षरविन्यासमात्रमपि बोधयति, तथापि अत्र तु स्वाभिलषितस्य प्रतिपादनाय क्रियमाणः अक्षरविन्यास इत्यर्थः एव गृह्यते। अन्यथा भाषाशिक्षणे तस्य विशेषप्रयोजनं न भवति।''[9]

एतेषां सर्वेषां कौशलानां संवर्धनं संस्कृतभारतीसंघटनं संपूर्णे राजस्थाने करोति। 'संस्कृतभारती' स्वस्य कार्ययोजनां दृढीभूतां कर्तुं

राजस्थानराज्यस्य प्रान्तत्रये निर्धारणं कृतमस्ति। ते एवं सन्ति– 1. चित्तौडप्रान्तः 2. जयपुरप्रान्तः 3. जोधपुरप्रान्तः

एतेषु त्रिषुप्रान्तेषु संस्कृतभाषाकौशलानां दक्षतायै विभिन्नकार्यक्रमाः यथासमयं प्रचलन्ति एव। तेषां कार्यक्रमाणां संचालनं 'संस्कृतभारती' संघटनस्य कार्यकर्तारः, शिक्षकाः, प्रशिक्षकाः, विद्यार्थिनः, सामान्यजनाः ग्रामं–ग्रामं गत्वा स्वक्षमतानुसारम् अनवरतरूपेण कुर्वन्ति। एते सर्वे आधुनिकविधिना अपि संस्कृतकौशलानां विकासाय प्रयासरताः सन्ति। यदि राजस्थानप्रदेशस्य परिप्रेक्ष्ये वयं पश्यामः तर्हि प्राप्यते यत् 1995 तमे वर्षे संस्कृतभारत्याः क्रियाकलापाः अत्र प्रारब्धाः। ततः आरभ्य इदानीं पर्यन्तं त्रिषुप्रान्तेषु बहूनां कार्यक्रमाणाम् आयोजनं जायमानमस्ति। ''भाषणकौशलवर्धनस्य सर्वोत्तमः उपायः नाम सम्भाषणमेव। बालाः यावदधिकं सम्भाषन्ते तावत् भाषाकौशलं प्राप्नुवन्ति। अतः बालाः अधिकाधिकं यथा भाषेरन् तथा प्रोत्साहनीयाः। विद्यालयस्य कक्ष्यायां, क्रीडांगणे गृहे चापि ते अधिकं भाषन्तां नाम।''[10]

''सम्भाषणशिबिरपाठ्यबिन्दूनां ज्ञानं संस्कृते सम्भाषणकुशलतां प्राप्तुम् इच्छुकेन प्राप्तव्यं प्राथमिकं ज्ञानं भवति। परन्तु ज्ञानमात्रेण सम्भाषणकौशलं न सिध्यति इति तु विदितमेव। तदर्थं निरन्तरम् अभ्यास एव अपेक्षितः। सन्तताभ्यासेन सम्भाषणेन सम्भाषणे धारावाहिता सिध्यति। सिद्धायामपि धाराप्रवाहितायां तावतापि न पर्याप्तम्। यतः भाषणकौशलस्य उद्देश्यं न दैनन्दिनव्यवहारनिर्वाहमात्रम्।... दोषरहितया भाषया भाषणं, तर्कसंगतं यथा स्यात् तथा भाषणं, श्रावकाणां आसक्तिवर्धनं यथा स्यात् तथा कथनं, धैर्येण भाषणं, स्वाभिलषितस्य विषयस्य स्वरसतापूर्वकं निरूपणम्, विषयप्रतिपादने तदनुकूलानामेव समुचितशब्दानां प्रयोगकरणम्– इत्यादीनि अपि तदुद्देश्यानि भवन्ति।''[11]

'संस्कृतभारती' राजस्थानप्रदेशे एतेषु त्रिषु प्रान्तेषु मुख्यरूपेण अधोलिखितानां प्रकल्पानां संचालनं करोति –

**संस्कृतसंभाषणशिविराणि**

''सर्वेषु अपि कार्यक्रमेषु प्राणभूतः कार्यक्रमः एषः प्रतिदिनं घण्टाद्वयमिव दशदिनानां निरन्तरकक्ष्या एव 'सम्भाषणशिबिरं' नाम। सामान्यतः 25–30 शिक्षार्थिनः। सर्ववयस्स्तरीयाः, सर्वविद्यास्तरीयाः अनधीतसंस्कृताः, स्त्रीपुरुषाः इत्यादयः सर्वे भागं वहेयुः– विना जाति–मतादिभेदम्। सम्भाषणशिबिरं संस्कृतान्दोलनस्य प्रवेशद्वारम् इव।''[12] राजस्थानप्रदेशे एतादृशानी एतादृशशिविराणि अनवरतरूपेण प्रचलन्ति।

**बालशिक्षणकेन्द्राणि**

''सायंकालसमये 30 निमेषान् एकघण्टां वा यावत् बालकेन्द्रं चलेत्। तत्र सम्भाषणं, भाषाशिक्षणं, क्रीड़ाः, सांस्कृतिककार्यक्रमाः च भवन्ति–संस्कृतमाध्यमेन। मार्गदर्शनाय संस्कृतभारत्या एतत्सम्बन्धे लघुपुस्तकमपि प्रकाशितम्। एतेषु बालकेन्द्रेषु बालाः क्रीडन्तः एव द्वित्रेषु मासेषु एव सम्भाषणाभ्यासं कुर्वन्ति। तेन तस्याः गृहं परितः स्थितेषु गृहेषु संस्कृतस्य प्रवेशः भवति।''[13]

**साप्ताहिकमेलनम्**

''प्रतिसप्ताहं निश्चिते दिने, निश्चिते समये, पूर्वनिश्चिते स्थाने सर्वे संस्कृतज्ञाः, संस्कृतच्छात्राः, संस्कृतानुरागिणः, कार्यकर्तारश्च घण्टां, घण्टाद्वयं वा यावत्, एकत्र आगच्छन्ति, संस्कृतेन व्यवहरन्ति इत्येतदेव साप्ताहिकमेलनं नाम। तस्मिन् मेलने भाषाभ्यासः, काव्याध्ययनं, पुस्तक–सम्भाषणसन्देशादीनां पठनं, भाषाक्रीडाः, गीतम् इत्यादयः कार्यक्रमाः भवन्ति। परं सर्वमपि संस्कृतेन एव।''[14]

**संस्कृतदिवसः संस्कृतसप्ताहश्च**

''श्रावणपूर्णिमा संस्कृतदिनम्। ततः पूर्वतनानि त्रीणि दिनानि अनन्तरीयाणि त्रीणि दिनानि च मेलयित्वा संस्कृतसप्ताहः आचरणीयः। एतस्मिन् अवसरे कार्यकर्तृणां कल्पकतानुगुणं प्रतिवर्षं विनूतनरूपेण संस्कृतसप्ताहः आचरितुं शक्यते।''[15]

**अभ्यासवर्गः** –''कार्यकर्तृणां प्रशिक्षणाय, कार्यशिक्षणाय, सामूहिकचिन्तनार्थं च अभ्यासवर्गः आयोज्यते। अयम् अभ्यासवर्गः प्रतिवर्षं भवेत्। वर्षारम्भे भवति चेत् उत्तमम्, येन वर्षस्य कार्यदिशा निश्चिता भवेत्। योजनायाः क्रियान्वयनं सम्यग् भवेत्, प्रत्येकं कार्यकर्तुः मनसि कार्यकल्पना स्पष्टा भवेत्, कार्यपद्धतिश्च विकसेत्। आहत्य कार्यस्य वेगः, गुणवत्ता च अधिका भवेत्।''[16]

**शिक्षणप्रशिक्षणशिबिरम्**

''एतत् द्विधा – सम्भाषणशिबिरचालकानां निर्माणाय, विद्यालये संस्कृतमाध्यमेन कथं पाठनीयमिति प्रशिक्षणाय च इति। सम्भाषणशिबिरचालनप्रशिक्षणाय दशदिनानाम् आवासीयं शिबिरं भवति। विद्यालये पाठनं कथमिति विषये आनुकूल्यानुगुणं प्रशिक्षणावधिः निश्चियते।''[17]

**व्याकरणशिबिरम्**

''व्याकरणांशानां ससूत्रे पाठनाय अयं कार्यक्रमः। एतेन शिक्षार्थिनां न केवलं भाषा शुद्धा भवेत् इति अपेक्षा, अपि तु अधिकाः जनाः व्याकरणशास्त्राध्ययने प्रवृत्ताः भवेयुः, व्याकरणे आस्थां वा कुर्युः, व्याकरणमपि रोचकरूपेण पठितुं शक्यते इति अवगच्छेयुः, व्याकरणं कथं पठनीयम् जानीयुः इत्यपि अपेक्षा।''[18]

**सान्ध्यशिक्षणकेन्द्राणि**

''सायंन्ध्याकाले त्रिचतुरघण्टानाम् अयं कार्यक्रमः सम्पूर्णतया संस्कृतेन। रूपकाणि, विनोदप्रसंगः, गीतानि, नृत्यानि, अभिनयाः, संस्कृतगृहेषु कथं व्यवहारः भवतीति प्रात्यक्षिकम् इत्येतादृशाः कार्यक्रमाः तत्र। अत्यन्तं प्रेरणादायी कार्यक्रमः एषः।''[19]

**संस्कृतवस्तुप्रदर्शिनी**

''दैनन्दिनोपयोगिनां सर्वेषा वस्तूनां संस्कृतनामानि लिखित्वा वस्तुभिः चित्रैः च सह सादृश्यैः सह वा स्थापनं, संस्कृतविज्ञानसम्बन्धे सचित्रविवरणं, संस्कृतसम्बन्धे, संस्कृतभारत्याः कार्यविषये च फलकानि, चित्राणि, चार्ट्स् इत्यादीनां द्वारा जनप्रबोधनम्।''[20]

'संस्कृतभारती' संघटनस्य इतोऽपि प्रकल्पाः सन्ति तान् संपूर्ण राजस्थानप्रदेशे त्रिषु प्रान्तेषु अस्याः कार्यकर्तारः संचालयन्ति। यथा– संस्कृतस्पर्धाः, संस्कृतगृहम्, विविधजयन्त्यः, पत्राचारद्वारासंस्कृतशिक्षणम्, संस्कृतप्रवासः, शोभायात्रा, वीथीनाटकम्, वीथीभाषणम्, सन्देशाभियानम्, जनपदसम्मेलनम्, प्रान्तसम्मेलनम्, स्वाध्यायशिबिरम्, भाषाबोधनवर्गः, शिबिराभियानम् इत्यादयः।

राजस्थानप्रदेशे राज्यसर्वकारः अपि संस्कृतसंवर्धनाय प्रयासरता अस्ति परंतु सर्वकारस्य प्रयासाः तावत् प्रभावशालिनः न सन्ति यावत् अपेक्षिताः। एतदर्थं

तान् प्रयासान् सफलीकर्तुं 'संस्कृतभारती' कार्यकर्तारः सर्वत्र गत्वा विभिन्नप्रकल्पानां संभाषणकौशलत्वेन संचालनं कुर्वन्ति।

"बहुजनहिताय बहुजनसुखाय"[21]

एतम् उद्घोषं स्वीकृत्य एव त्रिषु प्रान्तेषु कार्यं द्रष्टुं शक्यते। संस्कृतं तु भारतीयसभ्यतासंस्कृतेश्च मूलमस्ति। वयं जानीमः यत् संस्कृतं पठनपाठनाय 'समर्पणम्' आवश्यकं वर्तते तेनैव समर्पणेन राजस्थानप्रदेशे अधुना संस्कृतस्य स्थितिः सुकरा वर्तते। यदि संस्कृतं जीविताऽस्ति तर्हि संस्कृतिः अपि चैतन्यावस्थायां भवति। संस्कृतेन सह संस्कृतेः सम्बन्धः यदि विच्छिन्नी भवति, तर्हि भारतीयसंस्कृतेः संरक्षणं न भवत्येवा। अत एवोक्तं–

"संस्कृतेन सुसम्पन्नं भारतं भारतमुच्यते।
संस्कृतेन विना देशः केवलं चेण्डियोच्यते।।"[22]

**शोधनिष्कर्षः**

'संस्कृतभारती' संघटनम् अखिलभारतीयसंघटनमस्ति परन्तु अस्य कार्यक्रमाः विश्वस्य विभिन्नदेशेषु चलायमानाः सन्ति। राजस्थानप्रदेशे अपि एतस्य संघटनस्य प्रकल्पानां विभिन्नकार्यक्रमाः चित्तौड–जयपुर–जोधपुरप्रान्तेषु प्रचलन्ति। तैः जनेषु भाषाकौशलानां संवर्धनं भवति। राजस्थानप्रदेशस्य त्रयस्त्रिंशत् जनपदेषु संस्कृतभारत्याः प्रकल्पानां विशिष्टप्रस्तुतीकरणम् एतेन शोधपत्रेण जनानां कृते उपयोगी भविष्यति तथा च संस्कृतभाषाकौशलसंवर्धने संस्कृतभारत्याः प्रकल्पैः ते परिचिताः भविष्यन्ति इति।

संस्कृतभारतम्..... समर्थभारतम्....।

**अंतः टिप्पणी**


1. *संस्कृतसुभाषितानि, हंसा प्रकाशन–जयपुर*
2. *संस्कृतभारती (2005)–चमूकृष्ण शास्त्री, संस्कृतभारती, नवदेहली पृ.सं.–1*
3. *कौशलबोधिनी (2005)–डॉ. विश्वासः, संस्कृतभारती, नवदेहली पृ.सं.–5*
4. *हिन्दी शिक्षण (2011)–डॉ. शिखा चतुर्वेदी पृ.सं.–72*
5. *कौशलबोधिनी (2005)–डॉ. विश्वासः, संस्कृतभारती, नवदेहली पृ.सं.–7*
6. *तदेव पृ.सं.–8*
7. *तदेव पृ.सं.–24*
8. *तदेव पृ.सं.–49*
9. *तदेव पृ.सं.–81*
10. *तदेव पृ.सं.–29*
11. *तदेव पृ.सं.–29*
12. *संस्कृतभारती (2005)–चमूकृष्ण शास्त्री–संस्कृतभारती, नवदेहली पृ.सं.–23*
13. *तदेव पृ.सं.–27*
14. *तदेव पृ.सं.–25*
15. *तदेव पृ.सं.–26*
16. *तदेव पृ.सं.–34*
17. *तदेव पृ.सं.–35*
18. *तदेव पृ.सं.–35*
19. *तदेव पृ.सं.–29*
20. *तदेव पृ.सं.–30*
21. *विनय महांवग्ग (1989) आयुर्वेद हिन्दी संस्कृत पुस्तक भण्डार, जयपुर 1.11*
22. *संस्कृतनिबन्धशतकम्–हंसा प्रकाशन, जयपुर*